# Vasundhara Stotram

# વસુન્ધરાસ્તોત્રમ્

## Document Information

Text title : vasundharAstotram

File name : vasundharAstotram.itx

Category : devii, otherforms, buddha

Location : doc_devii

Proofread by : NA

Description/comments : From Nepali manuscript and N. Ghosh. Thesis (Print page 124+). Buddha stotra. Need proper correction.

Latest update : December 26, 2020

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

November 22, 2022

*sanskritdocuments.org*

# વસુન્ધરાસ્તોત્રમ્

ॐ નમઃ શ્રીવસુન્ધરા દેવ્યૈ ।

ॐ દિવ્યરૂપી સુરૂપી ચ સૌમ્યરૂપી વરપ્રદા ।
વસુન્ધરી વસુન્ધારી વસુશ્રી શ્રીકરી વરા ॥ ૧॥

ધરણી ધારણી ધાતા શરણ્યા ભક્તવત્સલા
પ્રજ્ઞાપારમિતા દેવી પ્રજ્ઞા શ્રીબુદ્ધિવર્ધિની ॥ ૨॥

વિદ્યાધરી શિવા સૂક્ષ્મા શાન્તા સર્વત્રમાતૃકા ।
તરુણી તારણી દેવી વિદ્યા દાનેશ્વરેશ્વરી ॥ ૩॥

ભૂષિતા ભૂતમાતા ચ સર્વાભરણભૂષિણી ।
દુર્દાન્તવાસિણી ભીમા ઉગ્રાગ્રપરાક્રમા ॥ ૪॥

દાનપારમિતા દેવી વર્ષણી દિવ્યરૂપિણી ।
નિધાનં સર્વમાઙ્ગલ્યે કીર્તિલક્ષ્મી યશસ્વિની ॥ ૫॥

દહની મારણી ચણ્ડી શબરી સર્વમાતૃકા ।
કૃતાન્તત્રાશની ભીમા કૌમારી વિશ્વરૂપિણી ॥ ૬॥

વીર્યપારમિતા દેવી જગદાનન્દરોચની ।
તાપસિ ઉગ્રરૂપી ચ ઋદ્ધિસિદ્ધિવરપ્રદા ॥ ૭॥

દાનપુણ્યમહાભાગા અજિતાજિતવિક્રમા ।
જગદેકહિતો વિદ્યા સઙ્ગ્રમ્યતારણી શુભા ॥ ૮॥

ક્ષાન્તિપારમિતા દેવી સાધની ધ્યાનધ્યાયિની ।
પાદ્માની પદ્મમાતા ચ પદ્માભાં શતમાલિની ॥ ૯॥ (પાદ્માની પદ્મધારિ ચ પદ્માસન સમાસિની)

શુદ્ધરૂપી મહાતેજા હેમવર્ણા પ્રભાકરી ।
ચિન્તામણિધરી દેવી પ્રજ્ઞાપુસ્તકધારણી ॥ ૧૦॥

નિધાનં કૂટમારુઢા ધાન્યાગારધનપ્રિયા ।

ત્રૈધાતુકં મહાઅડઢિ? દિવ્યાભરણભૂષિણી ॥ ૧૧॥

સરસ્વતી વિશાલાક્ષી ચતુર્બ્રહ્મવિહારિણી ।
તથાગતિ મહારમ્યા વજ્રિણી ધર્મધારિણી ॥ ૧૨॥

કર્મધાતેશ્વરી વિદ્યા વિશ્વજ્વાલાગુમણ્ડલી ।
બોધિની સર્વસત્ત્વાનાં બોધ્યઙ્ગકૃતશેખરી ॥ ૧૩॥ (કૃતસ્યશરમ્)

ધ્યાનાદિ મુક્તિ સમ્પન્ના અદ્વયાદ્વયભાવિણી ।
સર્વાર્થસાધની ભદ્રા સ્ત્રીરૂપામિતવિક્રમા ॥ ૧૪॥

માતરી સર્વબુદ્ધાનાં રત્નધાત્વેશ્વરેશ્વરી ।
શુન્યતા ભાવિની દેવી ભાવાભાવવિવર્જિની ॥ ૧૫॥

વૈનાયકિ વિનેતાચ દીપિણી ક્લેશછેદિની ।
ભિદિની સર્વમારાણાં સપ્તપાતાલક્ષોભિણી ॥ ૧૬॥

બ્રાહ્મણી વેદમાતાચ ગુહ્યરાટ્ ગુહ્યવાસિની ।
દર્શનિ બુદ્ધમાર્ગાનાં નષ્ટમાર્ગપ્રદર્શની ॥ ૧૭॥

વાગીશ્વરી મહાશાન્તિગોભિધાતૃ ધનં દદા ।
સ્ત્રીરૂપાધારણી સિદ્ધા યોગીની યોગમીશ્વરી ॥ ૧૮॥

મનોહરી મહાક્રાન્તિ સૌભાગ્યપ્રિયદર્શની । (શુભગાપ્રિય)
સાર્થવાહકૃપાદૃષ્ટિ સર્વતાથાગતાત્મકિ ॥ ૧૯॥

નમોઽસ્તુતે મહાદેવી સર્વસત્વાર્થદાયિણી ।
નમોઽસ્તુતે દીવ્યરૂપીચ વસુધારા નમોઽસ્તુતે ॥ ૨૦॥

અષ્ટોત્તરશતનામ ત્રિકાલય યથેદિમા ।
પ્રાપ્નોતિનિયત સિદ્ધિ ઇપ્સિત સુમનોરથમ્ ॥

તત્સર્વક્ષેપયિષ્યં તિસ્મરણાન્નામ ભદ્રકમ્ ।
અથવા શીલસમ્પન્ના સપ્તજાતિસ્મરો ભવેત્ ॥

પ્રિયશ્ચાદિય વાક્યશ્ચરૂપવાન્ પ્રિયદર્શનઃ ।
વિપ્રક્ષેત્રિયકૂલેષુ આદેયમુપાજાયતે ॥

અન્તેભૂમિશ્વરં પ્રાપ્તઃ પશ્ચાત્પ્રાપ્ત સુખાવતિ ॥

ઇતિ શ્રીવસુન્ધારાયાનામસ્તોત્રશતકં બુદ્ધભાષિતં સમાપ્તં શુભમ્ ॥

*Vasundhara Stotram*

pdf was typeset on November 22, 2022

Please send corrections to *sanskrit@cheerful.com*